Rashtriya Sanskrit Vidyapeetha ; Tirupati

***

F.No. RSVT/Admin/SVKendra/2017

Date: 5.9.2017

## Office Order

Sub:-R.S. Vidyapeetha, Tirupati –Establishment of Samskrita Vikasa Kendram in the Vidyapeetha – Nomination of Coordinator – Orders – Issued.

Ref:- Orders of the Vice Chancellor dated 5.9.2017.

***

The Vice Chancellor is pleased to nominate Prof. Prahlad R. Joshi as Coordinator of the Samskrita Vikasa Kendram, Tirupati to run the same in the Vidyapeetha campus.

He is requested to monitor the functioning of the above Kendra and arrange to furnish the monthly report to the undersigned.

The assignment is without detrimental to his normal duties and on honorary basis.

5/9

REGISTRAR

To
Prof.Prahlad R. Joshi
Department of Education
R. S. Vidyapeetha
Tirupati

Copy to:-

1.Dean, Academic Affairs for information and necessary action.
2.PFs of the officers concerned
3.PS to VC/FO/Reg.
4.DR/FO
5.File

# राष्ट्रियसंस्कृतविद्यापीठम् , तिरुपतिः

(मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा चतुरङ्कमापन्यां ३.७१ सञ्चितश्रेण्यङ्कमध्यमानेन

“ए” श्रेण्या प्रत्यायितं (द्वितीयचक्रम्)

## संस्कृतविकासकेन्द्रम्

## वार्षिकप्रतिवेदनम्

2017-18






अध्यक्षः

आचार्य वि.मुरलीधरशर्मा

संयोजकः

आचार्य प्रह्लाद रा.जोशी

# सदस्याः








# संस्कृतविकासकेन्द्रम्

एकस्य विश्वविद्यालयस्य उत्तरदायित्वं केवलं शास्त्राणां संरक्षणम् इति अस्माभिः चिन्त्यते किन्तु तन्न । न केवलं शास्त्राणां संरक्षणमेव अपि तु सामाजिक उत्तरदायित्वमपि भवति। न केवलं शास्त्राणां रक्षणं संस्कृतभाषायाः प्रसारप्रचारः अपि कुर्यात्। अतः तादृशं किञ्चित्

केन्द्रम् आवश्यकं यत्र भारतीयसंस्कृतिसम्बद्धान् विचारान् पाठयितुं व्यवस्था स्यात्, देशभक्तानां जीवनचरित्राणि श्रोतुम् अवसरः च स्यात्, यत्र च अनौपचारिकं शिक्षणं स्यात् यत्र च परीक्षायाः गृहपाठस्य वा भारः बालानां मनसि भयं न जनयेत्, यत्र च बालाः मातुः उत्सङ्ग इव उत्साहेन हसन्तः क्रीडन्तः एव अस्माकं संस्कृतिसम्बद्धान् विचारान् जानीयुः इत्येतस्याः कल्पनायाः मूर्तः आकारः एव "संस्कृतविकासकेन्द्रम्" ।

राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः आचार्य वि.मुरलीधरशर्मवर्यः संस्कृतविकासकेन्द्रस्य समुद्घाटनम् अकरोत् । एतस्मात् केन्द्रात् नागरेभ्यः

बालेभ्यः सर्वेभ्यः संस्कृतभाषायाः एवम् अस्माकं संस्कृतिसम्बद्धान् विचारान् पाठयन्ति ।

## संस्कृतविकासकेन्द्रस्य मुख्योद्देश्यानि एवं सन्ति-

- बालकेन्द्राणामयोजनम्।
- सम्भाषणशिबिराणामयोजनम्।
- गीताजयन्त्यादिपर्वणां निर्वहणम्।

- नुतनतया प्रविष्टानां भाषादक्षतायाः विकासः।
- अनुवर्तिकक्ष्यायाः निर्वहणम्।
- विशेषोपन्यासाः।

# अभिमन्युबालकेन्द्रम्

अद्यतनाः बालाः विद्यालयेषु यद्यपि भाषाः पठन्ति, तथापि भाषासम्बद्धान् सांस्कृतिकान् विषयान्, देशभक्तानां जीवचरित्राणि वा ज्ञातुम् अवसरं न प्राप्नुवन्ति। यतः विद्यालयस्य पाठ्यांशाः एव अधिकाः भवन्ति। अद्यतने विद्यालयशिक्षणे गृहपाठलेखनस्य अनुचितम् अतिप्राधान्यम् आगतमस्ति। एतावद्गृहपाठलेखनं बालानां सर्जनशीलतां सङ्कुचिता करोति, मनोविकासं निवारयति च। अत एव अद्यतनाः बालाः गृहपाठ-लेखनरहितानि विरामदिनानि सर्वदा निरीक्षमाणाः भवन्ति।

अतः तादृशं किञ्चित् केन्द्रम् आवश्यकं यत्र भारतीयसंस्कृतिसम्बद्धान् विचारान् पाठयितुं व्यवस्था स्यात्, देशभक्तानां जीवनचरित्राणि श्रोतुम् अवसरः च स्यात्, यत्र च अनौपचारिकं शिक्षणं स्यात् यत्र च परीक्षायाः गृहपाठस्य वा भारः बालानां मनसि भयं न जनयेत्, यत्र च बालाः मातुः उत्सङ्ग इव उत्साहेन हसन्तः क्रीडन्तः एव अस्माकं संस्कृतिसम्बद्धान् विचारान् जानीयुः इत्येतस्याः कल्पनायाः मूर्तः आकारः एव "बालकेन्द्रं" नाम।

संस्कृतस्य जनप्रियतासम्पादने सम्भाषणशिबिरम् इव अपरम् अत्यन्तं प्रभावि साधनं भवितुम् अर्हति बालकेन्द्रम्। यतः भारतीयसंस्कृतिसम्बद्धेषु विचारेषु बहवः संस्कृतस्तोत्ररुपेण सन्ति। तेषां पाठनेन बालाः सहजतया संस्कृतिविषये आसक्ताः भवन्ति। प्रथमे वयसि बालानां ग्रहणशक्तिः अधिका। अतः ते अल्पेन एव प्रयत्नेन बहून् अंशान् ग्रहीतुं शक्नुवन्ति। अन्यच्च संस्कृतशब्दाः मातृभाषायामपि भवन्ति इत्यतः संस्कृतभाषा तेषां कष्टाय न भवति। एतेन कारणेन तेषाम् उच्चारणमपि शुद्धं भवति। बालकेन्द्रे ये संस्कृतं जानन्ति ते बालकाः सहजतया स्वगृहे अपि संस्कृतभाषायाः प्रयोगं कुर्वन्ति एव। एवं **संस्कृतप्रचारार्थम् एकम् उत्तमं साधनं संस्कृतबालकेन्द्रम्।**

अद्यतने आधुनिकयुगे संस्कृतिः क्षीयमाणा वर्तते। तस्याः पुनरुज्जीवनाय समर्थाः अद्यतनाः बालाः एव। अद्यतनबालाः एव भारतस्य निर्माताः इति मन्वानाः विद्यपीठस्य कुलपतिः **आचार्यः वि.मुरलीधरशर्मवर्यः** बालकेन्द्रणामारम्भम् अकरोत् ।बालेभ्य जीवनस्य मुल्यं, भारतस्य संस्कृतेः विषये परिकल्पनाय एनं सङ्कल्पम् अकुर्वन् । 2017 शैक्षिकवर्षारम्भे विद्यापीठे एवं तिरुपतौ **17 बालकेन्द्राणाम्** आरम्भम् कुलपतेः मार्गदर्शनेन अभूत्। **विद्यापीठस्य अभिमन्युबालकेन्द्रे (100) शताधिकच्छात्राः** आसन् इति आनन्दकरः विषयः। एतेभ्यः प्रतिशनिभानुवासरं सायं 5.30 वादनतः 7.00 वादनपर्यन्तं कक्ष्याः भवन्ति। कक्ष्यायां श्लोकान्-गीतानि-नृत्यम्-वासरतीथिनां नामानि, संवत्सराणां, ऋतुनां नामानि, सामान्यसंस्कृतसम्भाषणम् एवं कथाः चित्रमाध्यमेन पाठ्यते।

अस्मिन् **अभिमुन्यबालकेन्द्रे 547 छात्राः** आसन् इति आनन्दकरः विषयः। विभिन्नानां जातीनां जनाः अत्र पठन्ति। भाषाध्ययनसमये जातिभेदः न भवति। एवमेव विभिन्नेषु विद्यालयेषु बालकेन्द्राणि विद्यापीठपक्षतः प्राचालयन्।

**तेषां विद्यालयानां नामानि -**

1. भुवनेश्वरिविद्यानिकेतनविद्यालयः, तिरचानुरु। [2]
2. श्रीविद्या बण्डर किडस् विद्यालयः, तिरुपतिः। [4]
3. कुमारविद्यालयः, तिरुपतिः। [2]
4. ओयासिस् विद्यालयः, तिरुपतिः। [2]
5. सान्दीपनिविद्यालयः, तिरुपतिः। [2]
6. भक्तिवेदान्तविद्यालयः, तिरुपतिः। [2]
7. Cambridge विद्यालयः, तिरुपतिः।[1]
8. राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः। [2]




छात्राः संस्कृतगीतं गायन्तः नृत्यन्तः सन्ति अभिमन्युबालकेन्द्रस्य छात्राः

# संस्कृतसम्भाषणशिबिरम्

या कापि भाषा दशसु दिनेषु पाठयितुम् एवं भाषितुं न शक्यते । किन्तु संस्कृतभाषा तादृशी सरला अस्ति तां भाषां दशसु दिनेषु भाषितुं शक्यते । तदर्थम् एव संस्कृतसम्भाषणशिबिरम् चाल्यते ।एतस्य पाठ्यक्रमःतथा निर्मितः यथा वयं सरलया रीत्या दशसु दिनेषु भाषितुं शक्नुमः। संस्कृतस्य जनप्रियतासम्पादने सम्भाषणशिबिरम् अपरम् अत्यन्तं प्रभावि साधनम् । एतद् सर्वं मनसि निधाय विद्यपीठस्य कुलपतिः आचार्यः वि.मुरलीधरशर्मवर्यः संस्कृतसम्भाषणशिबिरस्य आरम्भम् अकरोत् ।

आचार्य वि.मुरलीधरशर्मवर्यस्य सङ्कल्पानुसारं विद्यापीठे प्रतिमासं संस्कृतसम्भाषणशिबिरं चालितम्। एतावता विद्यापीठे सामाजिकानां पञ्च(5) शिबिराणि चालितानि। तेषु शिबिरेषु 328 जनाः भागगृहणं कृतवन्तः।

- **चालितसंस्कृतसम्भाषणशिबिराणां संख्या – 109**
- **छात्राणां संख्या – 2635**
- **<u>चालितसंस्कृतसम्भाषणशिबिराणां स्थानानि –</u>**

1. भारतीय प्रौद्योगिकी संस्था तिरुपतिः (IIT)।
2. भारतीयविज्ञानशिक्षानुसंधानसंस्था तिरुपतिः (IISER)।
3. श्री वेंङ्कटेश्वर आयुर्वेदकलाशाला तिरुपतिः।
4. बालमन्दिरं तिरुपतिः ।
5. श्रीविद्या वण्डरकिड्सविद्यालयः तिरुपतिः।
6. श्री वेंङ्कटेश्वर प्राच्यकलाशाला तिरुपतिः।
7. श्री वेंङ्कटेश्वर प्राच्यपाठशाला तिरुपतिः।
8. श्री पं.ज.ने.मु.उ.पाठशाला तिरुपतिः।
9. श्री वेंङ्कटेश्वर उच्चविद्यालयः तिरुपतिः।
10. केन्द्रियविद्यालयः तिरुपतिः।
11. भारतीयविद्याभवनम्, तिरुपतिः।
12. भुवनेश्वरीविद्यालयः तिरुचानूरुनगरम्।
13. वेङ्कटेश्वरविद्यालयः तिरुपतिः।
14. कुमारविद्यालयः तिरुपतिः।
15. अन्नमय्यविद्यालयः तिरुपतिः।

एतेषु स्थानेषु संस्कृतसम्भाषणशिबिराणि चालितानि।





शिबिरस्य उद्घटनावसरे कुलपतेः भाषणम्

सम्भाषणशिबिरे सामाजिकाः



विशिष्टसम्भाषणशिबिरस्य शिक्षार्थिनः

नागरैः सह संवादः



# गीताजयन्त्यादिपर्वाणि

एकस्य विश्वविद्यालयस्य उत्तरदायित्वं न केवलं शास्त्राणां रक्षणम् एव न, अपि तु समाजस्य उत्तरदायित्वमपि भवति। एतत् सर्वं मनसि निधाय अस्माकं विद्यपीठस्य कुलपतिः आचार्य वि.मुरलीधरशर्ममहोदयः समाजाय कार्यद्वयस्य आरम्भम् अकरोत् । समाजिकानां कृते योगशिक्षणम् एवमेव संस्कृतभाषाशिक्षणम्, भारतीयसंस्कृति-मानवीयमुल्यानां शिक्षणस्य आरम्भम् अकुर्वन् ।

विद्यापीठे 17/12/2017 दिनाङ्के भगवद्गीताजयन्तीम् उपलक्ष्य भगवद्गीताजयन्त्युत्सवस्य आरम्भं कृतवन्तः। अत्र अष्टादशेभ्यः विद्यालयेभ्यः भगवद्गीतायाः एकैकम् अध्यायं स्पर्धाय दत्तवन्तः। तेषु अध्यायेषु श्लोकानां कण्ठेस्थीकरणस्पर्धाः आयोजिताः। स्पर्धायाम् अष्टादशविद्यालयच्छात्राः भागग्रहणं कृतवन्तः।सम्पूर्णायां स्पर्धायां 519 छात्राः आसन्। तेषु 65 छात्राः पुरस्कारं प्राप्तवन्तः।

1. Cambridge School.
2. Bhuvaneshwari School
3. Wander Kids
4. Bhartiya Vidya bhavan’s.
5. S.G.S.High School,
6. S.P. Girls High School,
7. S.V.Oriental High School,
8. Bhaktivedanta swami mission School,

9. Sandeepani Vidyalaya,
10. K.V 1st Shift and 2nd Shift,
11. S.V. High School,
12. Oasis E.M.School,
13. Little Angels School,
14. R.S.V.P. Tirupati,
15. SPJNM High School,
16. Gitam School,
17. Kumar School
18. S.V. Children School

एतेभ्यः विद्यालयेभ्यः छात्राः समागताः। स्पर्धायाः निर्णायकत्वेन प्रतिष्ठितः न्यायाधीशः शिवप्रसादमहोदयः, श्रीलङ्कादेशतः आचार्य इन्दानन्द महोदयः, एवं ति.ति.दे तिरुपति अधिकारि शेषशैलेन्द्रमहोदयः, समाजसेवकः उदयकुमारः, शेखररेड्डि, चारुकेशः, श्रीलक्ष्मीः, वेङ्कटचारि, गीतावधानि आचर्य सच्चिदानन्दः, लक्ष्मीनारायणः, समीरदीपुलवसुप्रदासुब्रमण्यपारमितापण्डाशिवशङ्करहोतादयाः प्रमुखाः आसन् ।

समारोपकार्यक्रमे भगवद्गीतावधानम् इति विशेषकार्यक्रमः समायोजि। तत्र अष्टावधाननिरुपेण विद्यापीठस्य प्राक् शास्त्रिच्छात्रः श्री उमामहेश्वररावः अकार्षीत्। एषः सर्म्पुणभगवद्गीतां कण्ठेस्थीम् अकार्षीत् । अष्टावधाने अष्टौ पृच्छकाः आसन्। लक्ष्मीनारायणः, वेङ्कटाचारि, शिवशङ्करहोता, शेखररेड्डि, समीरसाहा, दीपुलरायः, गोवर्धनरेड्डि इत्यादयः आसन्।

संस्कृतविकासकेन्द्रस्य सदस्याः एतस्य कार्यक्रमस्य चालनं कृतवन्तः। एतस्य समारोपसमारम्भे गौरवातिथिरुपेण श्री.नी.मुक्तेश्वररावमहोदयः, अतिथिरुपेण श्री सञ्जीवकुमारमहोदयः समागतवन्तः । अध्यक्षाः विद्यापीठस्य कुलपतयः आचार्य वि.मुरलीधरशर्ममहोदयः।

कार्यक्रमेऽस्मिन् अतिथिरुपेण न्यायाधीशः के.शिवप्रवसादमहोदयः, ति.ति.दे अधिकारि शेषशैलेन्द्रमहोदयः, दक्षिणामुर्तिमहोदयः प्रभृतयः आसन्। प्रत्येकं विद्यालयस्य प्राध्यापकाः, शिक्षकाः समागतवन्तः। पितरः, पोषकाः, नागरिकाः, विद्यापीठच्छात्राः अपि आसन्।



भगवद्गीतास्पर्धायां छात्रा



गीताजयन्त्यां बालाः

## संस्कृतविकासकेन्द्रस्य प्रभावः

- प्रथमवारं विद्यापीठस्य समाजस्य मध्ये सम्बन्धः वर्धितः।
- समाजे संस्कृतभाषायाः विषये आसक्तिः जागरिता ।
- समाजात् अत्यधिकतया बालाः संस्कृतं पठितुं विकासकेन्द्रम् आगच्छन् ।
- गीताजयन्त्यादि कार्यक्रमाणां विस्यये विभिन्न विद्यालयेषु आसक्तिः जागरिता ।
- तिरुपतिस्थ IIT संस्थायां प्रथमवारं सम्भाषणशिबिरस्य आरम्भः अभवत् ।

- तिरुपतिस्थ IIT संस्थायां संस्कृतपाठ्यक्रमस्य आरम्भः अभवत् ।
- विकासकेन्द्रस्य कारणेन तिरुपतिनगरे 3 संस्कृतगृहाणां (Samskrit speeking homes ) निर्माणम् अभवत् ।
- एकस्मिन्नेव वर्षे 500 अधिकाः छात्राः संस्कृतं पठितुं विद्यापीठम् आगच्छन् ।
- प्राक्-शास्त्रि इत्यादिषु तिरुपतिस्थ (Local) छात्राणाम् आगमनम् ।

# संस्कृतविकासकेन्द्रस्य कार्याणां विवरणम्

## आगस्तमासे कृतानां कार्याणां विवरणम् :-

1. संस्कृतसप्ताहमुपलक्ष्य सम्पुर्णतिरुपतिनगरे पञ्चाशतः(50) शिबिराणम् आयोजनम् अकुर्वन्।
    - केन्द्रियविद्यालयः, तिरुपतिः(15)
    - श्री. पं.ज.ने.यु. उ. पाठशाला तिरुपतिः(4)
    - श्री वेंङ्कटेश्वर प्राच्यकलाशाला तिरुपतिः(3)
    - श्री वेंङ्कटेश्वर प्राच्यशाला,तिरुपतिः(4)
    - श्री वेंङ्कटेश्वर विद्यालयः तिरुपतिः(11)
    - राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः(15)

    सम्भाषनशिबिरे प्रविष्टच्छात्राणां संख्या 1270

2. विभिन्नविद्यायालयेषु स्पर्धाः आयोजिताः। तत्र 628 भग्रहणं कृतवन्तः। विजयेतृणां संख्या 104 ।
    - कथाकथनस्पर्धा।
    - गीतगानस्पर्धा।

- श्लोककण्ठपाठस्पर्धा।
- वेङ्कटेश्वरस्तोत्रकण्ठपाठस्पर्धा।
- भाषणस्पर्धाः।

3. संस्कृतसम्बद्धपुस्तकानां विक्रयणम् अकुर्वन्

## स्पेटम्बरमासस्यः-

१. मासे अस्मिन् अष्टौ स्थानेषु बालकेन्द्राणि आरब्धानि। तत्र संस्कृतस्य पाठः आरब्धः। विद्यापीठच्छात्राणां विशेषकक्ष्याणां आरम्भः कृतः। अत्र प्राकशास्त्री, शास्त्रीच्छात्राणां प्रातः एवं सायं 6.30 वादनतः 7.30 वादनपर्यन्तं विशेषपाठाः भवन्ति। धातुकण्ठपाठः, शब्दकण्ठपाठः, पाठ्यक्रमस्य विषयाणां पाठनं प्रचलति।

२. विद्यापीठे समाजिकानाम् एकं संस्कृतसम्भाषणशिबिरम् अभूत्। शिबिरे अस्मिन् 53 छात्राः आसन्।

## अक्टोबरमासस्यः-

- द्वित्रविद्यालयेषु बालकेन्द्राणाम् आरम्भः।
- भगवद्गीताजयन्तीमुपलक्ष्य भगवद्गीतावर्गः आयोजितः।अस्मिन् वर्गे बालाः एवं जेष्ठाः अपि आसन् इति विशेषः। भगवद्गीतायाः(15)

पञ्चदशाध्यायस्य पाठः आसीत्। कार्यक्रमस्य उद्घाटनं भगवद्गीतावधानि आचार्याः सच्चिदानन्दमुर्तिवर्याः अकार्षुः।

- संस्कृतच्छात्राणां संस्कृतेतरच्छात्राणां सरला इति परीक्षा चालनीया इति निश्चीय विभिन्नविद्यालयेषु एतस्याः प्रचारं कृत्वा छात्राणां प्रवेशं अकार्षुः। छात्रसंख्या 70 आसीत्।
- 

## नवम्बरमास्यः-

- विद्यालयेषु सरलापरीक्षायाः पाठनस्य आरम्भम् अकुर्वन्।
- भगवद्गीताजयन्तीमुपलक्ष्य विद्यालयेषु भगवद्गीताश्लोककण्ठेस्थीकरणस्पर्धा आयोजिता। तत्र नवविद्यालयेषु नवम अध्यायं दत्वा स्पर्धा समायोजि।
- विद्यापीठच्छात्राणाम् अपि भगवद्गीतायाः (17) सप्तदशोध्यायस्य स्पर्धा समायोजि।
- अभिमन्युबालकेन्द्रे संस्कृतस्य पाठः।
- बालकेन्द्रस्य अध्यापिकानां विशेषः वर्गः समायोजि। अत्र अध्यापिकाणां कृते, कथं पाठयेत्? कथं कक्ष्या नियन्त्रयेत्, इत्यादिविषये प्रशिक्षणं अभुत्।

## दिसम्बरमास्यः-

- शिक्षाशास्त्रिच्छात्राणां प्रशिक्षवर्गः अचालयत्।
- विद्यालयेषु भगवद्गीताजयन्त्याः आचरणम् अकार्षुः। वण्डरकिड्स विद्यालये विद्यापीठस्य कुलसचिवः सि.एच.पि.सत्यनारायणावर्याः कार्यक्रमस्य आरम्भं कृतवन्तः।
- विद्यापीठे भदवद्गीताजयन्तीसमारोपकार्यक्रमं कृत्वा छात्रेभ्यः प्रमाणपत्राणां वितरणम् अकुर्वन्।कार्यक्रमे विद्यापीठस्य कुलपतयः आचार्याः वि.मुरलीधरशर्मवर्याः असन्।



अभिमन्युबालकेन्द्रस्य छात्राः भाषाक्रीडायां निमग्नाः सन्ति

## <u>जनवरीमासस्यः-</u>

- मासारम्भे जोतिषशास्त्रध्येतृणां समाजिकाणाम् एकं संस्कृतसम्भाषणशिविरं समायेजि। एतेभ्यः प्रातः 5.30 तः 7.30 वादनपर्यन्तं कक्ष्या अभुत्। एते छात्राः विद्यापीठे दूरस्थविद्याम् अध्ययनं कुर्वन्ति। छात्रसंख्याः 24 आसीत्।
- विद्यापीठे विद्यमाने आधुनिकवृत्तिविकासकेन्द्रे एकं सम्भाषणशिबिरं समायोजि। अत्र विभिन्न उद्योगिनः संस्कृताध्यायनार्थं समागताः। एतेभ्यः एकमासात्मकः वर्गः आसीत्। (28) अष्टाविंशतिः छात्राः आसन्। अस्य वर्गस्य समायोजकः आचार्यः रमेशबाबुवर्याः आसन्।

## फेब्रवरिमासः-

- अस्मिन् मासे विद्यापीठे समाजिकानां पुनः एकमासात्मककालस्य संस्कृतसम्भाषणवर्गस्य आरम्भम् अकार्षुः। अस्मिन् वर्गे अभियन्तारः गृहिण्यः बालाः जेष्ठः तदितराः आसन्। अत्र 36 छात्राः आसन्। सायं 5.30 वादनतः 7.30 वादनपर्यन्तम् अभुत्।
- आयुर्वेदिककच्छात्रेभ्यः एकं सम्भाषणशिविरं समायोजि। अत्र 25 छात्राः आसन्।
- सरला परीक्षाम् अचालयन् विद्यापीठे। 70 छात्राः सरलापरीक्षाम् अलिखन्।


सम्भाषणशिबिरस्य चित्रम्


अभिमन्युबालकेन्द्रस्य वार्षिकोत्सवः


बालाः बालकेन्द्रे भाषाक्रीडां क्रीडन्तः सन्ति

## मार्चमासस्यः-

- प्राकशास्त्री छात्राणां कृते परीक्षमुपलक्ष्य विशेषकक्ष्याः समायोजि।
- अष्टादशबालकेन्द्राणां समारोपकार्यक्रमः विद्यापीठे समाभुत्। अत्र सर्वस्मात् बालकेन्द्रात् छात्राः समागच्छन्। सर्वेऽपि संस्कृतकार्यक्रममकुर्वन्। नाटकानि, नृत्यानि प्रदर्शितवन्तः।

अस्मिन् कार्यक्रमे दिनेशकामतमहोदयः, चान्दकिरणसलुजामहोदयः, मुक्तेश्वररावमहोदयः, अचार्याः मुरलीधरशर्मवर्याः समुपस्थिताः आसन्। कुलपतयः छात्राणां कृते एकं पुस्तकं विलिख्य छात्रेभ्यः तत् पुस्तकम् अदतुः।

एवं प्रकारेण संस्कृतविकाशकेन्द्रस्य कार्यानि आसन्। एतानि सर्वाणि कार्याणि विकाशकेन्द्रसदस्याः एवम् अन्ये कार्यकर्तारः अपुर्वन्। वर्षेऽस्मिन् 109 सम्भाषणशिविराणि, 17 बालकेन्द्राणि, गीताजयन्ती, प्रशिक्षणवर्गम् अचालयन्। विद्यापीठच्छात्रेभ्यः विशेषकक्ष्याः अपि अचालयन्।

## विविधवार्तापत्रिकासु संस्कृतविकासकेन्द्रस्य वार्ताः


సాక్షి
సంస్కృతికి మూలం
సంస్కృతమే..


### విద్యాపీఠంలో నేటి నుంచి బాల సంస్కృతం

తిరుపతి అన్నమయ్యసర్కిల్: తిరుపతి సంస్కృత విద్యాపీఠంలోని 'బాలవికాస కేంద్రం'లో శనివారం నుంచి బాల సంస్కృతం పేరుతో చిన్నపిల్లలకు సంస్కృత భాషను నేర్పించనున్నట్లు వీసీ మురళీధర శర్మ తెలిపారు. సంస్కృతి సాంప్రదాయాలు, మానవీయ విలువలను తమ పిల్లలకు తెలియజేయాలనే అభిలాష ఉన్న తల్లితండ్రులు తప్పక సంస్కృతాన్ని నేర్పించాలన్నారు. బాల వికాసకేంద్రంలో ఆటపాటలు, అర్థమయ్యేరీతిలో భాషను బోధిస్తామన్నారు. ఈ తరగతులు ప్రతి శనివారం సాయంత్రం 5.30 నుంచి 7వరకు నిర్వహించనున్నట్లు తెలిపారు. తిరుపతి పరిసరప్రాంత ప్రజలు, భాషాప్రియులకు ఇది చక్కటి అవకాశమన్నారు. దీనిని ప్రతి ఒక్కరూ సద్వినియోగం చేసుకోవాలని ఆయన కోరారు. మరిన్ని వివరాలకు బాల వికాసకేంద్ర నిర్వాహకులు కిరణ్ భట్‌ను నేరుగా కాని, 9481267438ను సంప్రదించి పేరును నమోదు చేసుకోవాలని కోరారు.

మురళీధర శర్మ


విద్యాపీఠంలో సంస్కృత భాష ఉచిత బోధన
బాలవికాసకేంద్రంలో సంస్కృతభాషాభివృద్ధి
ఆటపాటలతో పిల్లలకు సులభ విద్యాబోధన
పుస్తకం లేకుండానే సంస్కృతభాషణాచాతుర్యం

సంస్కృత పఠనంతో
మానసికోల్లాసం


సాక్షి సండే క్లాసిఫైడ్

బాల సంస్కృతానికి శ్రీకార



पटनानगरस्य अण्णेमार्गसमीपे भगवतः गौतमबुद्धस्य २५६२ तम जन्मजयन्तीपालनावसरे मुख्यमन्त्रिणा नीतिशकुमारेण बोधिवृक्षस्य विशेषपूजनं सम्पन्नम्।

# पञ्चदशादिनात्मकी भागवद्गीता—संस्कृतसम्भाषणशिबिरकार्यक्रमः

**मुख्यातिथिरूपेण राष्ट्रीयसंस्कृतविद्यापीठस्य कुलपतिः आचार्यः वि. मुरलीधरशर्ममहोदयाः, कुलसचिवः सी. हेच्. पी. सत्यनारायणमहोदयाः डा. दक्षिणामूर्तिमहोदयाश्च वेदिकामलकृत्य छात्रान् उद्बोधितवन्तः**





(वार्ता समायोजकः किरण भट्टः, प्रेषिका च डॉ एस.टी.पी. कनकवल्ली) तिरूपति। राष्ट्रीय संस्कृतविद्यापीठे केन्द्रविकासपक्षतः अप्रैल मासस्य पञ्चमदिनाङ्के बालेभ्यः तात्पर्यसहितं भगवद्गीतायाः सप्तदशोध्यायस्य पाठः, तेषां पितरेभ्यः संस्कृत सम्भाषणशिबिरञ्च समारब्धम्। अयं कार्यक्रमः अप्रैलमासस्य विंशतितम दिनाङ्कपर्यन्तं प्रत्यहं सायंकाले पञ्चवादनतः सार्धषड्वादनपर्यन्तमासीत्। भगवद्गीता–कार्यक्रमे द्विषष्ट्यधिक छात्राः सोत्साहेन भागमगृह्णन्। तथैव संस्कृत सम्भाषण शिबिरे षटत्रिंशत्यधिका–भिभावकाः भागं वोढवन्तः। पञ्चदशाहीना। कार्यक्रमस्य समापन समारोहे बालाः भगद्गीतायाः सप्त दशो–ध्यायस्य पारायणं कृतवन्तः। सम्भाषण शिबिरार्थिनः एव इमां सभां सञ्चालितवन्तः। एवं स्वानुभवमपि प्रकटितवन्तः। मुख्यातिथि रूपेण राष्ट्रीय संस्कृत विद्यापीठस्य कुलपतिः आचार्यः वि. मुरलीधर शर्ममहोदयाः, कुलसचिवः सी. हेच्. पी. सत्यनारायण महोदयाः डा. दक्षिणामूर्ति महोदयाश्च वेदिकामलकृत्य छात्रान् उद्बोधितवन्तः। कार्यक्रमस्य किरणभट्टः, परमेश्वरः, समीर साहा, दिपुल रायः, ध्रुव भट्टः, माधुरी, दुर्गा, तिरुमलश्रीः इत्यादयः अध्यापकाः आसन्।

# संस्कृतं पाठकेभ्यः सुवर्णावकाशः

**संस्कृतं न प्रान्तीयभाषा अपि तु विश्वभाषा। निरन्तरप्रवर्धमाना भाषा। व्यावहारिकी भाषात्वेन आनेतुं संस्कृतभारती निरन्तरकार्यतरा वर्तते।**



(वार्ता संयोजिकः किरणभट्टः प्रेषिका च डॉ एस.टी.पी. कनकवल्ली) तिरूपति। संस्कृतं न प्रान्तीयभाषा अपि तु विश्वभाषा। निरन्तरप्रवर्धमाना भाषा। व्यावहारिकी भाषात्वेन आनेतुं संस्कृतभारती निरन्तरकार्यतरा वर्तते। आधुनिकयुगे सञ्चारमाध्यमानां प्रभावः अस्माकमुपरि दरीदृश्यते। संस्कृतस्य प्रचारप्रसारे सञ्चारमाध्यमानि बहूपकुर्वन्ति।

तमेवांशं मनसि निधाय तिरुपतिस्थ रा. सं.विद्यापीठस्य कुलपतिः आचार्यः वि. मुरलीधरशर्ममहोदयः एवं एसवीबीसी भक्तिवाहिन्याः सीईओ मुक्तेश्वरावमहोदयस्य संयुक्ताध्वयर्वे 'संस्कृतं पठामः' इति कार्यक्रमः अस्मिन्मासे त्रयोविंशतितमे २३–४–२०१८ दिनाङ्के रात्रौ सार्धाष्ठवादनतः नववादनपर्यन्तं प्रसारितम्। अयं कार्यक्रमः सोमवासरतः शुक्रवासरपर्यन्तं प्रसार्यते। अग्रिमदिने सार्धनववादने पुनः प्रसार्यते। एवमेव अयं कार्यक्रमः 'एसवीबीसी यु–ट्यूब' मध्येऽपि द्रष्टुं शक्नुमः । अतः एनं सुवर्णावकाशः मा त्यजन्तु।

*तिरुपतिस्थ रा. सं.विद्यापीठस्य कुलपतिः आचार्यः वि. मुरलीधरशर्ममहोदयः एवं एसवीबीसी भक्तिवाहिन्याः सीईओ मुक्तेश्वरावमहोदयस्य संयुक्ताध्वयर्वे 'संस्कृतं पठामः' इति कार्यक्रमः अस्मिन्मासे त्रयोविंशतितमे २३–४–२०१८ दिनाङ्के रात्रौ सार्धाष्ठ वादनतः नववादनपर्यन्तं प्रसारितम्*



विश्वस्य वृत्तान्तं
पक्षात् पक्षात् संस्कृतपत्रम्
विशेष योजना
घर बैठे 'विश्वस्य वृत्तान्तः' समाचार पत्र प्राप्त करें